सुतस्तुष्टमन्तरैव विनश्यति” इति मनुः। द्वयोर्मध्ये “अन्तरान्तरेण युक्ते” पा० उक्तेः एतत्सम्बन्धिपदात् द्वितीया। अन्तरा त्वां मां हरिरिति” सि०कौ०। वर्ज्जने निकटे च मेदिनिः। [विस्मरत्यन्तरात्मेति” सा०द०।

**अन्तरात्मन्** पु० कर्म्म०। जीवात्मनि। “तदपि न हरिणाक्षी”

**अन्तरापत्या** स्त्री अन्तरे गर्भमध्येऽपत्यं यस्याः। गर्भवत्यां स्त्रियाम्।

**अन्तराय** त्रि० अन्तरं व्यवधानमयते अय—अच्। व्यवधानकारके। “अस्य ते वाणपातपथवर्त्तिनः कृष्णसारस्यान्तरायौ तपस्विनौ संवृत्तौ” शकु०। विघ्ने च “त्वमन्तरायो भवसि च्युतो विधिरिति” रघुः। “वैरी न चेद्द वेपथुरन्तराय” इति सा०द० ‘समाध्यन्तरायाश्च लयादयः वेदान्तसारे दर्शिताः यथा। ‘अस्याङ्गिनोनिर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारोविघ्नाः सम्भवन्ति। लयस्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः। लयविक्षेपणाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः। अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनं रसास्वादः, समाध्यारम्भसमये सविकल्पानन्दास्वादनं वा। अनेन विघ्नचतुष्टयेन रहितं चित्तं निर्व्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा, तदा निर्व्विकल्पकसमाधिरित्युच्यते। तदुक्तम्। “लये संबोधयेत् चित्तं विक्षिप्तं शमयेत्पुनः। सकषायं विजानीयात् शमप्राप्तं न चालयेत्। नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्” इति। योगशास्त्रोक्ताः प्रधानपुरुषसाक्षात्कारात् प्राग्भवाः प्रातिभादयः सिद्धयः विवेकसाक्षात्कारस्योपसर्गापरपर्य्याया अन्तरायाः यथोक्तं पातञ्जलसूत्रे ‘ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते” इत्यनेन प्रातिभादिसिद्धीरुक्त्वा ‘ते समाधावुपसर्गा व्युत्थाने सिद्धय इति” अयमर्थः। योगजशुक्लधर्म्मानुगृहीतेन मनोमात्रेण सर्वगोचरज्ञानं प्रातिभसिद्धिः। दिव्यानां शब्दस्पर्शरूपरसगन्धानां ग्रहणे योगजधर्म्मानुगृहीतानि श्रवणादीनि यथाक्रमं समर्थानि यदा भवन्ति तदा श्रावणवेदनादर्शास्वादवार्त्ताख्याः सिद्धयः। तथा च दिव्यशब्दग्रहणे यदा योगिनः श्रवणं समर्थं भवति तदा श्रावणमिति संज्ञा एवं दिव्यस्पर्शग्रहणसमर्था त्वक् वेदनासंज्ञा, दिव्यरूपग्रहणे समर्थं नेत्रं दर्शसंज्ञम्। दिव्यरसास्वादे समर्था रसना आस्वादसंज्ञा, दिव्यगन्धग्रहणे समर्थं घ्राणं वार्त्तासंज्ञा। ते प्रातिभादयः निःश्रेयसफले समाधौ तस्य योगिनः व्युत्थानसमये योगविरामकाले जायमानाः उपसर्गा भवन्ति। अतो मोक्षार्थी तानुपेक्षेतेति उपदेशप्रयोजनम् नह्यात्मसाक्षात्कारं विना सिद्धिकोट्यापि कृतकृत्यता भवतीति।

**अन्तराराम** पु० अन्तरे सर्व्वाभ्यन्तरेऽतिसूक्ष्मत्वात् आत्मनि आरमते क्रीड़ति आ+रम कर्त्तरि घञ्। आत्माभिरते। ‘योऽन्तःसुखोऽन्तराराम” इति गीता।

**अन्तराल** न० अन्तरं व्यवधानसीमामाराति गृह्णाति आ+रा-क रस्य लत्वम्। मध्ये अभ्यन्तरे। “तुतोष पश्यन् वितृणान्तराला”इति भट्टिः। ‘वधूप्रवेशोऽष्टदिनान्तराल” इति मुहू० दिङ्नामान्यन्तराले” पा०। सङ्कीर्णवर्णे च। “वर्णानां सान्तरालानां स सदाचार उच्यते” मनुः। तद्वर्त्तिनि त्रि० स्वार्थे अण् आन्तरालमप्यत्र न०।

**अन्तरालदिक्** स्त्री अन्तराला दिक्। दिशो मध्यायां विदिशि ऐशान्यादौ कोणे।

**अन्तरावेदि(दी)** स्त्री अन्तरा मध्यस्था वेदिः वा ङीप्। गजयोर्युध्यमानयोर्मध्यस्थायां कृत्रिमयवेद्याम्। ‘जयश्रीरन्तरावेदी मत्तवारणयोरिव” रघुः। अन्तरेति पृथक्पदमिति मल्लि०। “समूहे चान्तरावेद्यामिति” त्रिका०।

**अन्तरिक्ष** न० अन्तः स्वर्गपृथिव्योर्मध्ये ईक्ष्यते ईक्ष—कर्म्मणि घञ्, अन्तः ऋक्षाणि अस्य वा पृषो० पक्षे ह्रस्वः ऋकारस्य रित्वं वा। पक्षिमेघसञ्चारयोग्ये भूलोकस्वर्गमध्यवर्त्तिनि आकाशप्रदेशे। “पृथिवी हिङ्कारोऽन्तरिक्षं प्रस्ताव” इति छा० उप०। “अन्तरिक्षगतांश्चैव मुनीन् देवांश्च इति” मनुः। “तिर्य्यक् चान्तरिक्षं व्यपोहितमिति” अथ०। “अदितिर्द्यौरदितिरन्तरिक्षमिति” ऋ० १,८९, १०। “अदितिरदीना अखण्डनीया वा पृथिवी देवमाता वा सैव द्यौर्द्योतनशीलो नाकः ततश्च सैवान्तरिक्षम् अन्तरा द्यावापृथिव्योर्मध्ये ईक्ष्यमाणं व्योमेति” भा०। “त्रिश्वमाप्रा अन्तरिक्षमिति”ऋ० १,५२,१२। अन्तरिक्षमन्तरिक्षान्तं द्यावापृथिव्योर्मध्ये वर्त्तमानमाकाशं विश्वं सर्वमिति”भा०। “दिवञ्च पृथिवीं चान्तरिक्षमथो स्वरिति” सन्ध्यामन्त्रः। ततश्च द्यावापृथिवीमध्यस्थाकाशस्यैव भुवर्लोकरूपस्यान्तरिक्षत्वम्। “सादयाम्यन्तरिक्षस्य धर्त्रीमिति” य० १४,५। अन्तरिक्षस्य भुवर्लोकस्य धर्त्रीमिति” वेददीपः। अत्र अन्तरीक्षमपि। अस्यचान्तरीक्ष—